# 54 - चतुपञ्चाश दशकम्
# कालिय विष बाधा

त्वत् सेवोत्कस् सौभरिर् नाम पूर्वं कालिन्द्यन्तर् द्वादशाब्दम् तपस्यन् ।
मीनव्राते स्नेहवान् भोग लोले तार्क्ष्यं साक्षा दैक्षताग्रे कदाचित् ॥॥54-1॥

त्वत्वाहं तं सक्षुधं तृक्ष सूनुं मीनं कञ्चिज् जक्षतं लक्षयन् सः ।
तप्तश् चित्ते शप्तवानत्र चेत्त्वं जन्तून् भोक्ता जीवितं चापि मोक्ता ॥॥54-2॥
तस्मिन् काले कालियः क्ष्वेल दर्पात् सर्पारातेः कल्पितं भाग मश्नन् ।
तेन क्रोधात् त्वत्पदाम्भोज भाजा पक्ष क्षिप्तस् तद्दुरापं पयोऽगात् ॥॥54-3॥

घोरे तस्मिन् सूरजा नीर वासे तीरे वृक्षा विक्षताः क्ष्वेल वेगात् ।
पक्षिव्राताः पेतु रभ्रे पतन्तः कारुण्यार्द्रं त्वन् मनस् तेन जातम् ॥॥54-4॥

काले तस्मिन् नेकदा सीर पाणिं मुक्त्वा याते यामुनं काननान्तम् ।
त्वय्युद्दाम ग्रीष्म भीष्मोष्म तप्ता गोगोपाला व्यापिबन् क्ष्वेल तोयम् ॥॥54-5॥

नश्यज्जीवान् विच्युतान् क्ष्मातले तान् विश्वान् पश्यन् अच्युत त्वं दयार्द्रः ।
प्राप्योपान्तं जीवया मासिथ द्राक् पीयूषाम्भो वर्षिभिश् श्रीकटाक्षैः ॥॥54-6॥

किं किं जातो हर्ष वर्षा तिरेकः सर्वाङ्गेष्वित् युत्थिता गोपसङ्घाः ।
दृष्ट्वाऽग्रे त्वां त्वत्कृतं तत्विदन्तः त्वा मालिङ्गन् दृष्ट नानाप्रभावाः ॥॥54-7॥

गावश्चैवं लब्ध जीवाः क्षणेन स्फीता नन्दास् त्वां च दृष्ट्वा पुरस्तात् ।
द्रागावव्रुस् सर्वतो हर्ष बाष्पं व्यामुञ्चन्त्यो मन्द मुद्यन् निनादाः ॥॥54-8॥

रोमाञ्चोऽयं सर्वतो नश् शरीरे भूयस् यन्तः काचि दानन्द मूर्छा ।
आश्चर्योऽयं क्ष्वेलवेगो मुकुन्देति उक्तो गोपैर् नन्दितो वन्दितोऽभूः॥॥54-9॥

एवं भक्तान् मुक्त जीवा नपि त्वं मुग्धापाङ्गै रस्त रोगांस् तनोषि ।
ताद्दग् भूत स्फीत कारुण्य भूमा रोगात् पाया वायुगेहाधिनाथ ॥॥54-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥